त्रिपुरोपनिषद्

श्रीरामानन्दतीर्थकृतभाष्यानुसारेण पदच्छेदपूर्वकपदानां भावार्थः

तिस्रः पुरस्त्रिपथा विश्वचर्षणी अत्राकथा अक्षराः संनिविष्टाः।
अधिष्ठायैनमजरा पुराणी महत्तरा महिमा देवतानाम्।।1।।

तिस्रः पुरः = त्रिकोणचक्रं, त्रिपथा विश्वचर्षणी = त्रिप्रकारेण विश्वसृजनोन्मुखी, अत्राकथा – अत्र = पुरत्रये, अकथा = अकारादयः कादयः थादयश्च हळक्षेति विभक्ताः, अक्षराः = मातृकाः, सन्निविष्टाः = ऋज्वादिरेखाकारेण प्रविष्टाः। एनाः =पुरत्रयः, अधिष्ठाय = अवष्टभ्य, महत्तरा = अव्यक्तमहदहंकारा दयश्च, सत्यपि सा, अजरा = अपक्षयरहिता, पुराणी = जन्मरहिता, च भवति। देवतानां = महा कामेश्चर्यादीनां, महिमा = पूज्या, भवति।।1।।

नवयोनिर्नव चक्राणां दीधिरे नवैव योगा नव योगिनीश्च।
नवानां चक्रेऽधिनाथाः स्योना नवमुद्रा नवभद्रा महीनाम्।।2।।

नवयोनिः = नवत्रिकोणकारणा नवधातुहेतवश्च, नव = अधोमुखानि पंचत्रिकोणानि शक्तेः ऊर्ध्वत्रिकोण चतुष्टयरूपाणि च शिवस्येति नव, दीधिरे = चकासिरे, नवैव योगा = नवानां रेखाणां त्रिकोणत्वसंपाद नप्रान्तरेखाद्वयसंयोगाच्च नवसंख्याका योगा संयेगा दीधिरे। नवानां = बिन्दु–त्रिकोण–वसुकोण–दशार द्वय–चतुर्दशकोण–अष्टदलपद्म–षोडशदलपद्म–भूपुरत्रयात्मकानां चक्राणां, चक्रे = तद्रूपेण चकाशिरे, अधिनाथा = तेषां स्वामिनी च नवैव, ते च स्योना = सुखरूपा, तथा नवमुद्रा नवभद्रा सह महीना – मह्यः = चक्रिण्यो योगिन्यादयश्च पूज्या यया बभूवुः सा इना = तासां स्वामिनी भवति त्रिपुरादेवी।।2।।

एका सा आसीत्प्रथमा सा नवासीदासोनविंशदासोनत्रिंशत्।
चत्वारिंशदथ तिस्रः समिधा उशतीरिव मातरो मा विशन्तु।।3।।

प्रथमा = चक्रोत्पत्तिपूर्वं, सा = देवी, एका = अद्वितीया, आसीत्। सा = देवी, नव = अष्टभिः सह नव संख्याका, आसीत्। अथ = तदनन्तरं, आसोनविंशत् – आ+आस+ऊनविंशदिति पदच्छेदः, एवमग्रेऽपि; सा पुनः दशभिः सह ऊनविंशदासीत्, आ = विध्यर्थे। अथासोनत्रिंशत् = तथैवापराभिः दशभिः सह सा पुनः = ऊनत्रिंशदासीत्। अथ = एवमेव, चत्वारिंशत् तिस्रः = चतुर्दशभिः सह सैव त्रिचत्वारिंशदासीत्। समिधा = सा सम्यगिद्धा स्वयं प्रेरिता सती, उशती =वात्सल्यनिघ्नहृदया कामयमाना, मातरः = लौकिक जनन्य, इव, मा = मां, विशन्तु = मूलाधारादिषट्चक्रेषु प्रविशन्तु।।3।।

ऊर्ध्वज्वलज्ज्वलनज्योतिरग्रे वै तिरश्चीनमक्षरं तद्रजो भूत्।
आनन्दनं मोदनं ज्योतिरिन्दोरेता उ वै मण्डला मण्डयन्ति।।4।।

ऊर्ध्वज्वलज्ज्वलनज्योतिः – ऊर्ध्वं = ऊर्ध्वमुखं, ज्वलन् = भ्राजत्, ज्वलनं = प्रकाशात्मकं, ज्योतिः = बिन्दुचक्रात्मकं शैवतेजः, अग्रे = सर्वेषां चक्राणामुपरि, आस्ते। तमो = अप्रकाशस्वभावः, तिरश्चीनं = तिर्यग्भूतं तिरोहितमिव, ज्योतिः = सूर्येन्द्वग्न्यादीनां भवतीति, वै = प्रसिद्धत्ववाचको निपातः, तमेव भान्तमनुभाति सर्वमिति श्रुतेः। तदेवाजरं = जरादिरहितं शिवतत्त्वं स्वयमेव, रजः = ज्योतिर्मयं बिन्दुचक्रं, भूत् = अभूत्। आनन्दनं = आनन्दयति, मोदनं = मोदयति च, कः? इन्दोः = श्रीचक्राभिधस्येन्दोः ज्योतिः = तेजः। उ वै = प्रसिद्धार्थकौ निपातौ। एताः = सोमसूर्याग्न्यात्मका, मण्डलाः = ग्रन्थयः, मण्ड यन्ति =अलंकुर्वन्ति यथा मणिगतमयूखाः।।4।।

तिस्रश्च रेखाः सदनानिभूमेस्त्रिविष्टपास्त्रिगुणास्त्रिप्रकाराः।
एतत्पुरं पूरकं पूरकाणां मैत्री प्रथते मदनो मदन्या।।5।।

तिस्रः = त्रिसंख्याकाः, रेखाः = सहस्रदलपद्मकर्णिकारूपेण चतुर्द्वारोपेताः, सदनानि = निकेतनानि, भूमेः = पृथिव्याः, ताः पुनः किंरूपाः – त्रिविष्टपाः = स्वर्गमर्त्यपाताललोकरूपाः,

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

त्रिगुणाः = त्रिगुणात्मकाः, त्रिप्रकाराः = लोके ये त्रिप्रकारा दृश्यन्ते त्रिदेवाः, श्रौताग्नित्रय, ऋगादित्रय, मात्रात्रय आदयः, एतत्पुरं = श्रीचक्रनगरं, पूरकाणां = शुद्धविद्यादिपरानतदेवतायन्त्राणां, पूरकं = सन्धयितृकं भवति। मदनो = कामेश्वरः, मदन्या = कामेश्वर्या सह, मैत्री = अनन्यभावेन, प्रथते = वर्धते।।5।।

मदन्तिका मानिनी मंगला च सुभगा च सा सुन्दरी सिद्धिमत्ता।
लज्जा मतिस्तुष्टिरिष्टा च पुष्टा लक्ष्मीरुमा ललिता लालपन्ति।।6।।

मदन्तिका = अभिमतार्थप्रदानेन मदयति, मानिनी =अन्याधिककरणादात्मोत्कर्षो मानं तद्वती, मंगला = मंग्यते प्राप्यते पुण्यैरिति मंगलं तद्रूपा, चकारोऽप्यर्थः, सुभगा = शोभना भगा ऐश्वर्यादयोऽस्याः, पुनश्चकारोऽप्यर्थः, सा = पूर्वोक्ता मदनी, सुन्दरी = अभिरूपदेहं सुन्दरं वहतीति, सिद्धिमत्ता = सिद्धयोऽणिमाद्याः ताभिर्मत्ता, लज्जा = उपासकानां स्तोत्रैः चेतःसंकोचनं, मतिः = बुद्धिस्वरूपा, तुष्टिः = परमानन्दैकरूपत्वात्तृप्ता, इष्टा = सर्वेषां प्रिया, पुष्टा = सर्वसंपूर्णा, लक्ष्मीः = महावाक्यैर्लक्ष्यते, उमा = प्रणवसवरूपिणी, ललिता = सुकुमारांगविन्यासा, लालपन्ति = अजस्रं स्तुतिं कुर्वन्ती।।6।।

इमां विज्ञाय सुधया मदन्तीं परिसुता तर्पयन्तः स्वपीठम्।
नाकस्य पृष्ठे महतो वसन्ति परं धाम त्रैपुरं चाविशन्ति।।7।।

इमां = पूर्वोक्तां देवीं, विज्ञाय = सम्यक् ज्ञात्वा, सुधया = अमृतात्मकद्रवद्रव्येण, मदन्तीं = मत्तां, परिसुता = सोमात्मकेनामृतेनाभिष्टुता, तर्पयन्तः = प्रीणयन्तः, स्वपीठं = स्वशरीरं, नाकस्य = स्वर्गस्य, पृष्ठे = उपरिभागे, महतो = विस्तरतः, वसन्ति = तिष्ठन्ति, परं धाम = सर्वोत्कृष्टं तेजः, त्रैपुरं = त्रिपुराया तेजः, आविशन्ति = प्रविशन्ति।।7।।

कामो योनिः कामकला वज्रपाणिर्गुहा हसा मातरिश्वाभ्रमिन्द्रः।
पुनर्गुहा सकला मायया च पुरूच्येषा विश्वमाताऽऽदिविद्या।।8।।

कामः = ककारः, योनिः = एकारः, कामकला = ईकारः, वज्रपाणिः = लकारः, गुहा = ह्रींकारः, हसा = हकारसकारौ, मातरिश्वा = ककारः, अभ्रं = हकारः, इन्द्रः = लकारः, पुनर्गुहा = ह्रींकारः, सकलाः = सकारककारलकाराः, मायया = ह्रींकारेण, च = सह, पुरूची = पुरून् बहून् वर्णान् अंचति प्राप्नोतीति पंचदशाक्षरतां प्राप्ता, एषा विश्वमाता = विश्वस्य सर्वस्य माता जनयित्री, आदिविद्या = ब्रह्मविद्या।।8।।

षष्ठं सप्तममथ वह्निसारथिमस्या मूलत्रिकमादेशयन्तः।
कथ्यं कविं कल्पकं काममीशं तुष्टुवांसोऽमृतत्वं भजन्ते।।9।।

षष्ठं = हकारः, सप्तमं = सकारः, अथ = तयोरनन्तरं, वह्निसारथिं = ककारः, अस्याः = उक्तकादि विद्यायाः, मूलत्रिकं = आद्यक्षरत्रयं, आदेशयन्तः = अएईकारस्थानापन्नं सत् योजयन्तः, कथ्यं = प्रतिपाद्यं, कविं = सर्वज्ञं, कल्पकं = कल्पना कर्तृकं, कामं = पुरुषार्थान्कामयते, ईशं = सर्वान्कर्तुं ईशते, तुष्टुवांसः = स्तुवन्तः, अमृतत्वं = ब्रह्म, भजन्ते = प्राप्नुवन्ति।।9।।

पुरं महः त्रिमुखं विश्वमातुरवे रेखा स्वरमध्यं तदैष्ट।
बृहत्तिथीर्दशपंचादिनित्या सषोडशी पुरमध्यं बिभर्ति।।10।।

पुरं = स्थानं, महः = अव्यक्तमहदहंकाररूपकामेश्वरीवज्रेश्वरीभगमालिन्यः, त्रिमुखं = त्रिकोणरूपं, विश्व मातुः = विश्वस्य चराचरात्मकस्य मातुः जनयित्र्याः, अवेः = आदित्यस्याः, रेखा = ऋजुरूपा द्वादशरेखा, ऐष्ट = ऐच्छत, स्वरमध्यं = स्वरसंख्याकं मध्यं यस्य तत्, बृहत् = वृद्धिं प्रापयत्, तिथीः = शुक्लपक्षीय प्रतिपत्तिथिना आरभ्य, दशपंच = पंचदशसंख्यां पूरयित्वा, आदिनित्या = अमावस्यातिथि, सषोडशी = तया सह षोडशी भूत्वा, सा त्रिपुरसुन्दरी, पुरमध्यं = पुरमध्ये, बिभर्ति = स्थितो भवति।।10।।

द्वा मण्डला द्वा स्तना बिम्बमेकं मुखं चाथ त्रीणि गुहा सदनानि।
कामीं कलां काम्यरूपां चिकित्वा नरो जायते कामरूपश्च काम्यः।।11।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM

द्वा मण्डला = ईकारोभयपार्श्वस्थौ चन्द्राग्निरूपौ द्वौ मण्डलौ, द्वा स्तना बिम्बा = द्वे स्तनबिम्बे, एकं = ईकारोर्ध्वगतं सूर्यात्मकं बिन्दुं, मुखं = वक्त्रं, च = चिकित्वेति समुच्चयः, अथ = तदनन्तरं, त्रीणि = सूर्य सोमाग्निरूपाणि, गुहा सदनानि = देव्या रहस्यात्मकमण्डलानि, कामीं = शिवस्य पत्नीं, कलां = वर्णमयीं, काम्यरूपां = रविचन्द्रवह्निरूपां, चिकित्वा = ज्ञात्वा, नरः = उपासकः, जायते = भाति, कामरूपः = कन्दर्पसदृशः, काम्यः = वनिताभिः कमनीयश्च, भवतीति शेषः।।11।।

परिस्रुतं झषमाद्यं पलं च भक्तानि योनीः सुपरिष्कृताश्च।
निवेदयन् देवतायै महत्यै स्वात्मीकृत्य सुकृते सिद्धिमेति।।12।।

परिस्रुतं = द्रवद्रव्यं मध्वादि, झषं = मत्स्यं, आद्यं = अत्तुं योग्यं, पलं = आमिषं, च = अन्ययेग्यसात्त्विक पदार्थानां समुच्चयार्थकः, भक्तानि = अन्नानि, एतैः, योनीः = त्रिकोणस्थ त्रिपुरसुन्दर्यादयः, सुपरिष्कृताः = यथार्हं सुसंस्कृताः, च = अनुक्तसमुच्चयार्थः, निवेदयन् = निवेदनं कुर्वन्, देवतायै = द्योतनस्वभावायै, महत्यै = पूज्यायै, स्वात्मीकृत्य = स्वात्मसात्कृत्य, सुकृते = पूजात्मकधर्मविशेषे, बुद्धौ सत्यां, सिद्धिमेति = फलीभूतो भवति।।12।।

सृण्येव सितया विश्वचर्षणीः पाशेनैव प्रतिबध्नात्यभिकान्।
इषुभिः पंचभिर्धनुषा च विध्यत्यादिशक्तिररुणा विश्वनजया।।13।।

सितया = ज्ञानशक्त्या, सृण्या = अंकुशरूपया, विश्वचर्षणीः = विश्वसृजनोन्मुख्यपि, (स्वभक्तान् मोहशास्त्रेभ्यो व्यावर्तयतीति शेषः), अभीकान् = कामुकान्, मोहशास्त्रेषु प्रवर्तयन्ति, इव = न वस्तुतः, कथं? पाशेन = स्वभक्तान्ज्ञानात्मकपाशेन स्वाभिन्नत्वेन तथा कामुकांश्च रागात्मकपाशेन स्वभिन्नत्वेन, प्रतिबध्नाति = बन्धनमापादयति। पंचभिः = पंचसंख्याकैः, इषुभिः = अरविन्दाशोक चूतमल्लिकानीलोत्पलाख्येषुभिः, धनुषा = मनसा, विध्यति = ताडयतीव, आदिशक्तिः = परा शक्तिः, अरुणा = अरुणाख्या, विश्वजन्या = विश्वजनयित्री।।13।।

भगः शक्तिर्भगवान् काम ईश उमा दाताराविह सौभगानाम्।
समप्रधानौ समसत्त्वौ समोजौ तयोः शक्तिरजरा विश्वयोनिः।।14।।

भगः = श्रीः, शक्तिः = शिवाभिन्ना, भगवान् = श्रीमानुत्पत्त्यादिवेत्ता वा, काम ईशः = कामेश्वरः, उमा = कामेश्वरी, इह = अस्मिन् लोके, सौभगानां = सौभाग्यानां, दातारौ = अभिन्नत्वादुभयोरपि दातृत्वं, समप्रधानौ = समप्रकृतिकौ, समसत्त्वौ = समतत्त्वात्मकौ, समोजौ = समौजसौ, तयोः = शक्तिशक्तिमतोः, शक्तिः = श्रीदेवी, अजरा = षड्भावविकारशून्या, विश्वयोनिः = जगत उपादानकारणं।।14।।

परिस्रुता हविषा भावितेन संकोचे प्रगलिते वैमनस्कः।
सर्वः सर्वस्य जगतो विधाता भर्ता हर्ता विश्वरूपत्वमेति।।15।।

परिस्रुता = सर्वतो द्रवता, हविषा = सूत्रात्मकेन प्राणेन, भावितेन =शोधितेन, संकोचे = जीवात्मके प्राणे, प्रगलिते = प्रनष्टे, सति, वैमनस्कः = विगतमनाः, सर्वः = शर्वः, सर्वस्य = चराचरात्मकस्य, जगतः = प्रपंचस्य, विधाता = स्रष्टा, भर्ता = रक्षकः, हर्ता = संहारकः, सन्, विश्वरूपत्वं = प्रपंचाकारतां, एति = प्राप्नोति।।15।।

इमं महोपनिषत् त्रैपुरीया यामक्षरं परमो गीर्भिरीट्टे।
एषर्ग्यजुः परमेतच्च सामेवायमथर्वेयमन्या च विद्या।।16।।

इयं = स्वबुद्धिप्रत्यक्षा, महोपनिषत्, त्रैपुरीया = त्रिपुरादेवतायाः, यां = त्रिपुरां, अक्षरं = तुरीयं कामकलाख्याक्षरं, परमः = शिवः, गीर्भिः = श्रुतिस्मृत्यागमाभिः, ईट्टे = स्तौति, यतः, एष = तुरीयः, ऋग्यजुः = एतौ वेदौ, परं = तयोः पश्चात्, एतच्च = एतदेव, साम = वेदविशेषः, अयमेव = तुरीय एव, अथर्वा = वेदविशेषः, इयं च = तुरीयमेव, अन्या = इतिहासपुराणाद्या, विद्या, इत्युपनिषत्।।16।।

।। श्रीभास्कररायसूरिकृतभाष्यानुसारेण पदच्छेदपूर्वकपदानां भावार्थः।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM